National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(60): 190-192
© 2025 NJHSR
www.sanskritarticle.com

**नारायणशर्मा**
शोधच्छात्रः, (न्यायविभागः),
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः, नई दिल्ली

**Correspondence:**
**नारायणशर्मा**
शोधच्छात्रः, (न्यायविभागः),
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः, नई दिल्ली

# प्रेत्यभावस्वरूपविमर्शः

**नारायणशर्मा**

**सारसंक्षेपः**

*धर्मार्थिकाममोक्षरूपपुरुषार्थचतुष्टये सर्वश्रेष्ठः मानवजीवनस्यान्तिमो लक्ष्यः पुरुषार्थः 'मोक्षः' इति। अत एव सर्वेषु दार्शनिकग्रन्थेषु मोक्षमेव मनसि निधाय व्याख्या सञ्जाता। सर्वेषां भारतीयदर्शनानां मुख्यं लक्ष्यं मोक्ष एव भवति। स च मोक्ष आत्मसाक्षात्कारात् जायते। स च तत्त्वज्ञानेन। जगदि विद्यमानानां समस्तप्रमेयतत्त्वानां यथार्थज्ञानं प्राप्तिः प्रमाणाधीना भवति। यथोक्तम् – **'मानाधीनामेयसिद्धिर्मान-सिद्धिश्च लक्षणात्'** इति। तत्र द्रव्यादीनामर्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वबोधात् निःश्रेयसं सम्भवतीति तु वैशेषिकाः। अक्षपादाः अपि वदन्ति – **'प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवाद-जल्पवितण्डाहेत्वाभासच्छल-जातिनिग्रहस्थानानां तत्त्वज्ञानान्निः श्रेयसाधिगमः'**। अर्थात् प्रमाणादीनां षोडशपदार्थानां तत्त्वाधिगमात् निःश्रेयसस्य प्राप्तिर्भवति। तथा च द्वादशप्रकारकाणि प्रमेयाणि। गौतमोऽधोलिखितानि द्वादशविधानि प्रमेयाणि स्वीकरोति। इमे द्वादशसंख्याकाः प्रमाविषयाः वर्तन्ते। एतेषां द्वादशविधप्रमाणानां मध्ये नवमप्रमेयत्वेन प्रेत्याभावस्य प्रसक्तिः। अतः अस्मिन्नेव शोधप्रबन्धे प्रेत्याभावविषयकचर्चा आचार्याणां मतमभ्युपेत्य मन्मतमपि आञ्जस्येन वर्णितम्।*

**'दृश्यते अनेन, दृश्यत इति'** करणभावव्युत्पत्त्याभ्यां दर्शनपदं प्रमाणप्रमेयात्मकसर्वजगद्वाचकम्। वस्तुतः दर्शनं प्रमेयतत्त्वविज्ञानदृष्टिः इति वक्तुं शक्यते। तत्र यानि करणानि तानि प्रमाणानि, ये विषयाः तानि प्रमेयाणि। **'अपवर्गसाक्षात्कारणतत्त्वधीविषयतावच्छेदकरूपवत्त्वं प्रमेयसामान्यलक्षणमिति'**[1]। प्रमेय-तत्त्वञ्चात्मशरीरेन्द्रियादिभेदाद् द्वादशविधम्[2]। द्वादशप्रमेयेषु नवमप्रमेयस्य (प्रेत्यभावस्य) विषये सूत्रं विद्यते – **'पुनरुत्पत्तिः प्रेत्यभावः'**[3]।

जन्ममृत्योरनुक्रमः प्रेत्यभावः। **"उत्पन्नस्य क्वचित्सत्त्वनिकाये मृत्वा या पुनरुत्पत्तिः स प्रेत्यभावः"**[4]। उत्पन्नभूतजीवस्य मरणानन्तरं यत् पुनरागमनं तत् प्रेत्यभावः इति। उत्पन्नस्यार्थः सम्बद्धः। केन सह सम्बन्धः – देहेन्द्रियमनस्बुद्धिर्वेदनाभिः सह सम्बन्धः। तात्पर्यमिदमनेन पुनरुत्पत्तिनाऽऽत्मनः देहादिभिः सम्बन्धः। यत्र कुत्रापि प्राणसंयुक्तशरीरे स्थितं पूर्वोपात्तदेहादीनां सम्बन्धं भवति तत्र जन्म विद्यते, तयोः संयोगेन व्युत्पन्नं अर्थात् देहं विच्छेद्य पुनर्जन्म प्रेत्यभावः वर्तते। सत्त्वनिकाये प्राणिनिकाय इत्यर्थः। **"पुनर्ग्रहणं संसारस्यानादित्वज्ञापनार्थम्"**[5] पुनः पुनः जन्मावसानयोः जगत अनादित्वं सूचितम्। अनादित्वं नाम पूर्वापरकालानियामकत्वम्। **"कः पुनरयं संसारः? सोऽयं दुःखादीनां मिथ्याज्ञानपर्यन्तानां कार्यकारणभावोऽवच्छिन्नः संसारः"**[6] इति। मुक्तं भूत्वापि संसारी शरीरादिं परित्यज्य तदीय अन्यः शरीरप्राप्तिः संभवाद् इति आशयेन वार्त्तिककारः शङ्कितः। परिशुद्धिकारैरपि उक्तम् - **"शरीरादीनां दोषपर्यन्तानां परित्यागपूर्वकः प्राप्तिलक्षणो धर्मः प्रेत्यभावः"**[7]।

प्रेत्यभावस्य सिद्धिः यतो हि आत्मा नित्यः वर्तते। नित्यस्य जन्मोऽपि न मृत्युरपि नैव सञ्जायते। **'ध्वंसाभावत्वं नित्यत्वम्'** अतः नित्यभूतेऽऽत्मप्रमेये जन्ममरणयोरभावादसिद्धिः इति सर्वविदितः। यदि प्रेत्यभावम् अनित्यं स्यात् तर्हि सर्वतन्त्रसिद्धान्तं 'पुनर्जन्म' इति नैव सङ्गच्छते।

स च जन्ममरणपरम्परायाः पुनः पुनः भवनम् अनादित्वं दर्शयति। यदा अपवर्गं भविष्यति तदा अस्याः परम्परायाः ध्वंसो भविष्यति।

एवञ्च प्रेत्यभावस्वीकारे का युक्तिरिति जिज्ञासायामुच्यते सूत्रकारैः **"आत्मनित्यत्वे प्रेत्यभावासिद्धिः"**[8] अर्थात् प्राप्तशरीरं त्यक्त्वा नवशरीरं ग्रहणमेव प्रेत्यभावो भवति। अयं पुनरुत्पत्तिः कस्य उच्यते, आत्मनः शरीरस्य वा। नाद्यः अनित्यधर्मरहितत्वात्। द्वितीयस्य तु उत्पत्तिर्भवति किन्तु पौनःपुन्येन न भवति। न तु मृतदेहस्य पुनरुत्पत्तिः गृह्णाति। एवमेव प्रेत्यभावः नित्यात्मतत्त्वस्वीकारे सम्भविष्यति।

अधुना विचिकित्सा जायते तस्य देहस्य कथमुत्पत्तिर्भवति। अत्र सूत्रकारैः महर्षिगौतमैः उक्तम् – **"व्यक्ताद् व्यक्तानां प्रत्यक्ष-प्रामाण्यात्"**[9]। व्यक्ताद् कारणाद् व्यक्तानां कार्याणाम् उत्पत्तिर्भवतीति प्रत्यक्षप्रमाणेन सिद्धः। यथा व्यक्तमृत्तिकायाः अथवा मृदवयवाभिः व्यक्तघटस्य उत्पत्तिः प्रत्यक्षमिति। अनेन प्रकारेण व्यक्तशरीरं स्वावयवरूपी व्यक्तकारणैः सञ्जायते। शरीरेण कारणेन ये भूततत्त्वं पृथिव्यादिकं ते परमसूक्ष्मनित्यपरमाणुषु विद्यते। तस्मात् परमाणोः त्रसरेण्वादेः रूपे पृथिव्यादिकं भूततत्त्वमुत्पन्नं भवति। तानि भूततत्त्वानि शरीरेन्द्रियेन्द्रिय-ग्राह्यान्यसमस्तेभ्यः पदार्थेभ्यः तथा आत्मनः योगसाधनभूतान्य-पदार्थेभ्यः समवायिकारणं भवति। पृथिव्यादिसमस्तद्रव्यादिकं व्यक्तजगत् पूर्वोक्तमूलोपादानतत्त्वेभ्यः यथाक्रमम् उत्पन्नं भूत्वा दृष्टिगोचरं भवति।

व्यक्तपदार्थम् इन्द्रियग्राह्यम्। तस्य व्यक्तस्य समानतया कारणतत्त्वमपि व्यक्तं भवति। कार्यकारणयोः रूपादिगुणानां योगं तयोः समानता भवति। रूपादिगुणेभ्यः युक्तं परमसूक्ष्मभिः नित्यपृथिव्यादिपरमाणुभिः रूपादिगुणयुक्तशरीरादिकं जायते। अनेन प्रकारेण प्रत्यक्षप्रमाणं वर्तते, रूपादिगुणयुक्तमृत्तिकायाः रूपादिगुण-युक्तघटस्य उत्पत्तिः प्रत्यक्षसिद्धः। अनेन अदृष्टमूलो-पादानतत्त्वानामपि रूपादिगुणयुक्तस्थितेः अनुमानं करणीयम्। प्रत्यक्षगृहीतपृथिव्यादेः कारणकार्ययोः रूपादिगुणानाम् अन्वयः कारणात् कार्यं दृश्यते। अस्यां रूपादिनामनुक्रमः मूलोपा-दानपरमाणुतः प्राप्नोति। अनेन रूपादिगुण-युक्तं नित्यमतिन्द्रिय-परमाणूनां रूपादिगुणयुक्तविश्वकार्याणां प्रति कारणम् अनुमानेन स्वीकृतः।

नित्यपरमसूक्ष्मपरमाणुभिः स्थूलशरीरं कथम् उत्पद्यते? तस्याः प्रक्रियायाः अपि प्रस्तुतसूत्रेण संकेतः कृतः। यथा दृष्टजगदनुसारेण मूलोपादानतत्त्वानां स्वरूपं निर्दिशति। ते परमाणवः नरनारीषु शुक्रशोणितरूपेण संयोगेन देहस्य उत्पन्नं करोति। अनेन प्रकारेण व्यक्ततत्त्वाद् व्यक्तदेहादेः उत्पत्तिः भवति।

तत्र प्रेत्यभावः कस्य भवति इति जिज्ञासायां बहवः पक्षाः समागच्छन्ति। तेषु बुद्धेः प्रेत्यभावो भवति इति केषाञ्चित् मतम्। देहपिण्डस्य प्रेत्यभावः इति अपरेषां मतम्। आत्मनः प्रेत्यभावः इति अन्येषां मतम् इति मतविशेषदर्शनात् भवति विप्रतिपत्तिः। विप्रतिपत्त्या च भवति विचारस्य प्रसक्तिः। ईदृशविषये मतत्रयदर्शनात् कथं प्रेत्यभावः सिद्धिः इति विचिकित्सायां सूत्रकारः गदति भविष्यत्यचेतनत्वात्। अथ च यदा पूर्वशरीरेण सह आत्मापि नङ्क्ष्यति, तदा आत्मविनाशेन तस्य पुनः जन्म न भविष्यति अथवा यदि आत्मनः विनाशः स्वीक्रियते चेत् तर्हि विदितयागादि-फलभोगस्यानुत्पत्तिः, ऋष्युपदेशानामानर्थक्यञ्च। पूर्वोक्तदोषशमनार्थं नित्यत्वविशिष्टात्मतत्त्वं स्वीकर्तव्यम्, तेन प्रेत्यभावस्य निर्दोष-सिद्धिर्भविष्यति। **'मरणम् – आत्मनो भोगाय-तनदेहेन्द्रियादिवियोग उच्यते, जन्म तु तत्सम्बन्धः'**। अतः नित्यः आत्मा (प्रेत्य) पूर्वशरीरं परित्यज्य (भवति) जन्म जायते अर्थात् शरीरान्तरं 'आत्मनित्यत्वे प्रेत्यभावसिद्धिः'। तस्य सूत्रस्य सूत्रार्थः भाष्यकारैः निगदितः यत् 'आत्मनो नित्यत्वात् जन्ममरणयोः अनुत्पत्तिः जन्ममरणेत्युभयं प्रेत्यभावः' इति। अर्थात् पूर्वशरीरं त्यक्त्वा शरीरान्तरग्रहणमेव प्रेत्यभावः स च आत्मनः नित्यत्व एव सम्भवति। तथा च उक्तम्- **"तच्चैतदुभयम् - पुनरुत्पत्तिः प्रेत्यभाव इति, तच्चैतत् नित्यत्वे संभवतीति"**[10]। वार्त्तिककारः वदति – **"न पुनः जन्ममरणे आत्मन्युत्पादविरोधौ नित्यत्वात् नित्य आत्मनि"**[11]। तात्पर्यटीका-कारस्तु इत्थं वक्ति "पूर्वाभ्यस्तसूत्रे आत्मनित्यत्वव्यवस्थापनात् सत्त्वोत्पादोच्छेदे च कृतहानाकृताभ्यागमदोषेणाभ्युदयनिः श्रेयसार्थम-प्रवृत्तिः ऋष्युपदेशानर्थक्यं प्रसङ्गश्च स्वेदेहेन्द्रियबुद्धिसंवेदना-सम्बन्धोत्पादविनाशौ नित्यस्यात्मनो जन्मप्रायणे तथा चोपपन्नः प्रेत्यभाव इति सिद्धान्तः"[12]। अभिप्रायस्तु शरीरेन्द्रियादि व्यतिरिक्तात्मनः चेतनत्वात् स्तन्यपानादिषु प्रवृत्तिदर्शनात् च आत्मनः नित्यत्वं चेतनत्वं च नैयायिकैः स्वीक्रियते। आत्मनः नित्यत्वे सूत्रकारोऽपि वदति – **"पूर्वाभ्यस्तस्मृत्यनुबन्धात् जातस्य हर्षभयशोकसम्प्रतिपत्तेः"**[13] **"प्रेत्याऽऽहाराभ्यासकृतात् स्तन्याभिला-षात्"**[14]।

एवञ्च -

**"नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।**
**न चैनं क्लेदयन्त्यापो न शोषयति मारुतः"**[15]॥

**"वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।**
**तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही"**[16]॥

इत्यादि प्रमाणेन आत्मनः नित्यत्वसिद्धिर्भवति। आत्मनित्यत्वे च प्रेत्यभावस्य सिद्धिर्भवति इति न्यायसूत्रभाष्यवार्तिककारादिनाम् अभिमतम्।

एवञ्च विश्वस्मिन् परलोकविद्यायाः महत्त्वं विद्यतेऽत एव पाश्चात्यदेशेऽपि विषयेऽस्मिन् नानासिद्धान्ताः प्रतिपादिताः। एवञ्च स्मृतिग्रन्थेष्वपि प्रेत्यभावविषये यदुक्तम् –

**"देवत्वं सात्त्विका यान्ति मनुष्यत्वं च राजसाः।**
**तिर्यक्त्वं तामसा नित्यमित्येषा त्रिविधा गतिः"**[17]॥

पुराणशास्त्रे पुर्नजन्म दुःखस्य कारणं भवतीति प्रतिपादयति तथा च भगवद्प्राप्त्या एव समेषां दुःखानामन्तो भवति। श्रीमद्भगवद्गीतायां प्रतिपादितमति यत् –

**"मामुपेत्य पुनर्जन्मदुःखालयमशाश्वतम्।**
**नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः"[18]।**

अर्थात् परमात्मनं प्राप्तिः जीवनस्य लक्ष्यं भवति। आत्महत्या महत्पापः विद्यते। यदा मनुष्यः मृत्युलोके मह्येन दुःखेन पीडितो भवति तदा सः स्वनाशं (आत्महत्यां) प्रति अग्रसरः भवति। आत्महत्यायाः पापरूपत्वात् तेन निम्नयौनौ पुनर्जन्म लभ्यते।

**"असूर्या नाम ते लोका अन्धेन तमसाऽवृताः।**
**तांस्ते प्रेत्याभिगच्छन्ति ये के चाऽऽत्महनो जनाः"[19]।**

कठोपनिषद्यपि प्रतिपादितमस्ति –

**"न साम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम्।**
**अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे"[20]॥**

अर्थात् यः मूर्खः मदान्धं भूत्वा स्वं हन्ति, सः परलोकस्य विषये किमपि न जानाति। तस्मात् कारणात् चक्रारपङ्क्तिरिव पुनः-पुनः मृत्युलोके दुःखभोगनाय आगच्छति। योगदर्शने अपि उक्तम्- **"क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः"[21]** एवमेव प्रकारेण पुराणादिषु प्रेत्यभावस्य विषये बहुचिन्तनमाख्यानोपख्यानमाध्यमेन विद्यत इत्यलम्।

**<u>सन्दर्भग्रन्थसूची</u>**


1.**ईशावास्योपनिषद् हनुमानप्रसाद पोद्दार,** गीताप्रेस गोरखपुर सं. 2024

2.**कठोपनिषद् (शाङ्करभाष्य सहित)** गीताप्रेस गोरखपुर सं. 2024

3.**न्यायदर्शनम्** महर्षिगौतमः, सं.अनन्तलाल ठक्करः, मिथिलाशोध-संस्थानम्, दरभंगा, 1967

4.**न्यायदर्शनविमर्शः** कालीप्रसादसिंहः, संस्कृत बुक डिपो,1980 न्यायनये शब्दबोधकारणविमर्शः डॉ. एन्.आर. शठकोपताताचार्य, जगन्नाथ संस्कृत विश्वविद्यालय, 2006

5.**न्यायपरिशुद्धिः** (न्यायतत्त्वप्रकाशिकानामकव्याख्यासहितः).

6.**न्यायभाष्यम्** वात्स्यायनः, सं. नारायणमिश्रः काशी संस्कृतग्रन्थ-माला 48,1970

7.**न्यायवार्त्तिकम्** उद्योतकराचार्यः, सं. विन्ध्येश्वरीप्रसाद द्विवेदी, बिब्लोथिका इण्डिका, कलकत्ता, 1887

8.**न्यायवार्त्तिकतात्पर्यटीका** वाचस्पतिमिश्रः,सं.राजेश्वरशास्त्री द्राविड, काशी संस्कृत सीरीज, सं.24, 1925

9.**न्यायसूत्रम् गौतमः**, सं. नारायणमिश्रः, काशी संस्कृत ग्रन्थमाला, 43, वाराणसी, 1970

10. **न्यायतत्त्वालोकः द्वितीयवाचस्पतिमिश्र**, गङ्गानाथझा केन्द्रीय संस्कृत विद्यापीठ ग्रन्थमाला, 33, प्रयाग, 1992

11. **मनुस्मृतिः पण्डित गिरिजाप्रसादद्विवेदी,** नवलकिशोरविद्यालय गोमती तट, लखनऊ १९१७

12. **श्रीमद्भगवत् गीता स्वामी रामसुखदास,** गीताप्रेस गोरखपुर २७३००५ गोविन्द भवन कोलकाता का संस्थान सं. २०७५


[1]न्या. तत्त्वालोक १/१/८ (पृ. १८)

[2]न्या. सू. १/१/९

[3]न्या. सू. १/१/१९

[4]न्या.सू.भा. १/१/१९ (व्या.)

[5]न्या. वा. (पृ. ४४७)

[6]न्या. वा. (पृ. ४४७)

[7]न्या. वा. ता. टी. प. (पृ. ४४८)

[8]न्या. सू. ४/१/१०

[9]न्या. सू. ४/१/११

[10] न्या. भा. पृ. 344

[11] न्या. वा. पृ. 452

[12] न्या. वा. ता. टी., पृ. 490

[13] न्या. सू. 3/1/18

[14] न्या. सू. 3/1/21

[15] श्रीमद्भगवद्गीता 2/23

[16] श्रीमद्भगवद्गीता 2/22

[17] म. स्मृ. 12/40

[18] श्रीमद्भगवद्गीता 8/15

[19] ई. उ. 19

[20] उ. अ.1 व.2 मं.6

[21] यो. सू. सा. पा. 12 (2/12)